**|| श्री स्वामी सामर्थ ||**

---

# ||शत्रु विध्वंसनी स्तोत्रम्||

---

विनियोगः

ॐ अस्य श्रीशत्रु-विध्वंसिनी-

स्तोत्र-मन्त्रस्य ज्वालत्-पावक ऋषिः

अनुष्टुप छन्दः

श्रीशत्रु-विध्वंसिनी देवता

मम शत्रु-पाद-मुख-बुद्धि-जिह्वा-कीलनार

शत्रु-नाशार्थं

मम स्वामि-वश्यार्थे वा जपे पाठे च विनियोगः।

ऋष्यादि-न्यासः

शिरसि ज्वालत्-पावक-ऋषये नमः।

मुखे अनुष्टुप छन्दसे नमः

हृदि श्रीशत्रु-विध्वंसिनी देवतायै नमः

सर्वाङ्गे मम शत्रु-पाद-मुख-बुद्धि-जिह्वा-कीलनार्थ

शत्रु-नाशार्थं, मम स्वामि-वश्यार्थे वा जपे पाठे च विनियोगाय नमः।।

करन्यासः

ॐ ह्रां क्लां अंगुष्ठाभ्यां नमः।

ॐ ह्रीं क्लीं तर्जनीभ्यां नमः।

ॐ ह्रूं क्लूं मध्यमाभ्यां नमः।

ॐ ह्रैं क्लैं अनामिकाभ्यां नमः।

ॐ ह्रौं क्लौं कनिष्ठिकाभ्यां नमः।

ॐ ह्रः क्लः करतल-करपृष्ठाभ्यां नमः।

हृदयादि-न्यासः-

ॐ ह्रां क्लां हृदयाय नमः।

ॐ ह्रीं क्लीं शिरसे स्वाहा।

ॐ ह्रूं क्लूं शिखायै वषट्।

ॐ ह्रैं क्लैं कवचाय हुम्।

ॐ ह्रौं क्लौं नेत्र-त्रयाय वौषट्।

ॐ ह्रः क्लः अस्त्राय फट्।

ध्यानः-

रक्तागीं शव-वाहिनीं त्रि-शिरसीं रौद्रां महा-भैरवीम्,
धूम्राक्षीं भय-नाशिनीं घन-निभां नीलालकाऽलंकृताम्।

खड्ग-शूल-धरीं महा-भय-रिपुध्वंशीं कृशांगीं महा-
दीर्घागीं त्रि-जटीं महाऽनिल-निभां ध्यायेत् पिनाकीं शिवाम्।।

मन्त्रः-

“ॐ ह्रीं क्लीं पुण्य-वती-महा-माये सर्व-दुष्ट-वैरि-कुलं
निर्दलय क्रोध-मुखि, महा-भयास्मि, स्तम्भं कुरु विक्रौं स्वाहा।।”

मूल स्तोत्रः-

खड्ग-शूल-धरां अम्बां, महा-विध्वंसिनीं रिपून्।
कृशांगींच महा-दीर्घां, त्रिशिरां महोरगाम्।।
स्तम्भनं कुरु कल्याणि, रिपु विक्रोशितं कुरु।
ॐ स्वामि-वश्यकरी देवी, प्रीति-वृद्धिकरी मम।।
शत्रु-विध्वंसिनी देवी, त्रिशिरा रक्त-लोचनी।
अग्नि-ज्वाला रक्त-मुखी, घोर-दंष्ट्री त्रिशूलिनी।।

दिगम्बरी रक्त-केशी, रक्त पाणि महोदरी।
यो नरो निष्कृतं घोरं, शीघ्रमुच्चाटयेद् रिपुम्।।

।।फल-श्रुति।।

इमं स्तवं जपेन्नित्यं, विजयं शत्रु-नाशनम्।
सहस्त्र-त्रिशतं कुर्यात्। कार्य-सिद्धिर्न संशयः।।
जपाद् दशांशं होमं तु, कार्यं सर्षप-तण्डुलैः।
पञ्च-खाद्यै घृतं चैव, नात्र कार्या विचारणा।।

।।श्री शिवार्णवे शिव-गौरी-सम्वादे विभीषणस्य रघुनाथ प्रोक्तं शत्रु विध्वंसनी स्तोत्रम्।।

---

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थापर्ण मस्तु||